
कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

पापाहः १	गोकुलीराजा २१
देमागाद २	गौरीश्लाणं २२
राजाराजा ३	निर्धलिकाय २३
काश्यारेद ४	कस्पालकर २४
सत्यासत्य ५	केष्टामानगजा २५
वीजेक स्रद ६	सुरारिसुरार २६
लक्ष्मीवंनक्ष ७	उत्तमवद्धीरिपु २७
योध्यामाद्रि ८	आसाद्यतिय २८
यावत्तोयध ९	घनघनाघन २९
क्षपेतांभवतो १०	अर्द्धौग्रेमया ३०
एकबाणेन ११	संध्यावंदनवेला ३१
कदाचिद्योगे १२	विभाकारे सुधा ३२
प्रभार्थे किंवद १३	अर्जुनांतेयराराद ३३
आयादलंविनी १४	दिवराजामया ३४
वासनावासु १५	विभस्य किंकु ३५
हस्तेनदतीया १६	अन्यस्त्रीस्पर्द ३६
आयुध्यंकम १७	...कआमिय ३७
साधिध्रक्षिपले १८	...नयद ३८
सुरारउपला १९	पुंसः संबोधनां कि ३९
वनधस्तमगो २०	सरोमेहमयसाला ४०

श्री
।। लंसिंजेपाहि ।।।
।।। मामंबदीनोहं तव कृपा ।।।
तः दुधटिकाव्यस्य सटीकस्पले ।।।
।।। खनेशनो कंठेस्मिन स्माखदीयरूपाक ।।।
।।। दक्षतः समालिंगयतु यदि भवला ।।।
।।। उयेस्यते नहिकं प्रतिशरणं ।।।
।।। यास्येतस्मान्निर्विघ्नं ।।।
।।। संपूर्णं कुरु श्रीः ।।।
।।। श्री ।।।

कःस्याद्बुद्धया ६२	कदा...
दधंकुंभमनो ६३	अर्धविस...
तस्माः क्वस्थिरता ६४	विराटनगरे...
कुत्रभीतिरिभामु ६५	लक्ष्मेयवरे वलेभ...
कोनिर्दग्धः स्त्रियु ६६	कदाचिद्रामयाराम...
व्यामोहं तव शिवंतु ६७	लक्ष्मीकटाक्षनासा...
पान्धीबंधानुरिपा ६८	
हलेंबोदरलंबुर ६९	
रामरामेति रामेति ७०	
याभानामममता माया ७१	
व्याधाधाक्केथवंकि ७२	
विनायो वनमार्गे ७३	
कःस्येभालिहलो ७४	
भक्तनरपक्षरक्षित ७५	
राजंस्त्वद्वैरिनारी ७६	
अर्धराज्येस्त्रसाधे ७७	

Acc. No. – ~~1845~~ M1465
Title – दुधटिकाव्यटीका (संपूर्ण)
Author – वैद्यनाथपायगुंडे
Date – शके 1768
Subject – Poetry
folio – 33 folio
Xerox – 66

श्री॰

१

श्रीगणेशायनमः॥श्रीमल्लुलितांबिकायैपरदेवतायैनमोनमः॥नमःश्रीदक्षिणामूर्तयेनमः
नत्वागुरुं वैद्यनाथःपायगुंडोयथामति॥व्याचष्टेस्वल्पकुःश्लोकान् बालधीरतिसिद्धये॥१
मूलं॥पायाद्वःकरणोरणोरणरणोराणोरणोवारणोदत्तायेनरमारमारमरमारामार
मासारमा॥सश्रीमानुदयोदयोदयदयोदायोदयोदेदयोविष्णुर्जिष्णुरभीरभीरभरभी
राभीरभीसारभीः॥१॥पदच्छेदः॥पायात्।वः।करणः।अरणः।रणरणः।राणः।रणो
वारणः।दत्ता।येन।रमा।आर।मारं।अरमारामा।रमा।आस।आरमा॥सः।श्रीमान्।
उदयोदयः।अदयदयः।दायोदयोदेदयः।विष्णुः।जिष्णुः।अभीरभीः।अभरभीराभी
रभीसारभीः॥१॥अथव्याख्या॥सःतत्त्वमसीत्यत्रतत्पदवाच्यसर्वज्ञत्वादिविशिष्टात्मावि
ष्णुःवेवेष्टिव्याप्नोतीतिव्यापकःनारायणःवःअविद्याविशिष्टाभिमानिनःयुष्मान्पा
यात्।रक्षतु।अनेनरक्षणाशीर्व्दाराशुस्मादिप्रासङ्गंउत्पत्तिस्थितिप्रलयादिकर्तृत्वंसग

वतिप्रतिपादितं। दशावतारजनकत्वं चत्वयीतिविशेषणमुखेनाह। कथंभूतः सः। क
रणः कंजलं रणातिभक्षयतीति गच्छतीति वा करणः। जलभक्षः जलचरो वेत्यर्थः। करण
रणगतौ कण धातोर्वा दिगत्यर्थत्वात् अनेकार्थत्वेन भक्षणार्थत्वाद्वा पचाद्यच्चि रूपं।।
अनेन मत्स्यकूर्मावतारित्वं व्यज्यते। वेदसंरक्षणार्थमाद्यः पृथिवीधारणार्थं द्वितीय इ
ति पुराणादौ प्रसिद्धं। पुनः ०अरणः नविद्यते रणः संग्रामो यस्य सः विनायुद्धं बलिनि
ग्रहीतत्वात्। अनेन वामनावतारित्वं ध्वन्यते। यत्तदोर्नित्यसंबंधत्वात् सः कः। यस्य
राणः रणरणः रणो वा रणः। यस्य विद्यो(?) राणः रणस्मायं राणः रणसंबंधी रणर
णः अट्टाट्टहासः संहारभैरवनादः कर्तरि णाय(?) प्रत्ययं कर्तुमारावेण शब्दं कुर्वतीत्याक
यंतीत्यर्थः। नेरणावः। आङ्पूर्वात् शब्दार्थत्वान्नचादेर्डिनो ह्रस्वो तात्(?) उङ् धातोर्विवि
गलेआऽङ्सहएङोतिपररूपं। पुनः रणशब्देनआ माङोओति पररूपेण मूर्ध्नवत्

१

रणो सम्बोधनः ॥ नान रणाः द्वितीयान्तमेतत् । महायोद्धॄन् वारयति तस्याल्पला
यनं कारयति सः रणो वारणः रणलालसान् रिपून् विध्वंसयतीत्यर्थः । अनेन नृ
सिंहावतारित्वं ध्वन्यते । नृसिंहरूपेण भगवता अनुपादाये वरास्त्रादिकं नखैररि
विध्वंसनं कृतं । सकः । यस्मात् मा लक्ष्मीः मारं प्रद्युम्नकं दर्पवतारं प्रद्युम्नं आसा
प । यद्वा जन्यं न प्रद्युम्नेन यनेहरता लोके भवदित्यर्थः ॥ अनेन लावण्ये कासिधि प्रद्यु
म्नजनकं कृष्णावतारित्वं ध्वन्यते । गत्यर्थस्य रुच्यते लिंदि मारे तिरूनं । अनेन श्रीकृष्णो
पि भगवानवलमेवेति ध्वनितं । पुनश्च सकः । मारमा । मारीणां समूहो मारं मीना
ति हिनस्ति सः मारमाः तेन मारमा एतेन किं विशिष्टः परपुरमः मारमाः इति
प्रथमान्तत्वेन व्याख्यानं भ्रममूलकमपास्तं । विशेष्यस्य येनेत्यस्य तृतीयान्तत्वे
न नकृत्तेने त्येनैनेव बिबिवहिः अध्याहारेण व्याख्यानस्यासंगतमनुचितत्वाच्च ॥ आ

दुर्वकातहि सार्थकात्मीनाते विचित्रमीनानिमीनोनीति आत्मे आरमाविश्व पावतात्नौय
मलत्। आरिरूपक्षत्रिघातकेनयेनपरशुरामेण दत्ता सकलराज्यलक्ष्मी ओ(?)त्मणाय दत्ता
आपादिताररमालक्ष्मीः आरमारमान विद्यते रमा लक्ष्मी येषां ते अरमाः निर्धनाः आश्र
णाः भिक्षुकाः तान् आरमय ति आल्हादयति सा अरमारमा। आर्द्र दूर्व व ड्रुमतोर्णि चिमि
त्वाक्रस्वत्सेच मतोणि नंतास्य चाद्यचित्तापिरत्पमेनात्। औं हि आनंददायिनी आसबस्त्वे स
र्थः। धात्रनामनेकार्थत्वेन सत्तार्थकस्य यस्य तेर्षिविरूपलदर्थकमव्ययं बोध्यं। अनेन क्ष
त्रियांतकमहोदार परशुराम अवतारत्वं सूचितं। एवमपि दानक्षीणेतर दातृत्वे धर्म्मं दर्शयि
ति। पुनः सकः। श्रीमान् नित्यश्रीर्यस्य सः। परमैश्वर्य संपन्न इत्यर्थः। पुनः सकः। उदयाद
यः। आशिष्ट आगमदिस्रयः। अयतेर्गत्यर्थकाद् आत्मनेपदिनः पचाद्यचि अथवा नञ्पूर्वा
धातेः केचिदात्मरूपेन यासीद प्राप्नोदित्यर्थः अप्राप्तः गतो वा मत्त्व ईति यावत्। उदयो आविर्भा
वो

5

२ र्यस्पतत्स्नअभ्योदयं यस्य धरादिद्वन उद्धृतं उद्धारितं रसातलादुपरि आनीतं येन सः।
अनेन जलनिमग्न पृथ्वी पर्वताद्युत्थारणकर्ता वराहावतारः सूचितः। पुनः सः कः। अ
दयदयः। न विद्यते दया येषां ते अदयाः निष्करुणाः हिंस्रा इत्यर्थः। तेषु दया यस्य जी
वमात्र दयालुरित्यर्थः। अहिंसा परमो धर्म इति आदि शास्त्रावलंबिबौद्धावतारित्वं ध्व
नितं। अदयेषु निष्करुणेषु पापिजनेषु दयनो हिंसनं करोतीति अदयदयः। कलियु
गांते पापिष्ठनाशकत्वेन कल्क्यवतारत्वं सूचितं। पुनः सः कः। दायोदयोदयः।
उद्धृतं अयो लोहं येन सः उदयः सः दायायभागाय आपि अयं तं ... उदयः सः दायोदयः सः
राज्यं गृहीतुकामाय धृतराष्ट्राः कौरवाः पांडवाश्च वा तान् ... इति
दायोदयोदः। घातेरतोनुपसर्गेतिक रूपमेतत्। तस्मिन्नर्जुने दुर्योध
नेवादयते रूपां करोतीति सः दायोदयोदयः। न कृष्णे कृतीति
स सम्यान्विलुकः। अनेनाद्य आख्याने दृष्टान्ते ...

द्वितीयव्याख्याने सान्वयं विनैव बलरामावतारित्वं व्यज्यते। पुनः कथंसः। जिष्णुः जे
तृशील इत्यर्थः। अनेन सर्वोत्कृष्टरावणजेतृत्वेन रामावतारित्वं व्यज्यते। पुनः० अभी
रुभीः स्त्रियं रांति ददति ते भीराः। भीरुकेक र्मरूपपदे शानार्थात् धातोरतोनुपसर्गे कैं अ
तोलोप इति अलोपे भीर इति रूपं पंचम्यंते नभी शब्दस्य समासः। तथा परदारापहरणा
द्युपद्रवदायिनो रावणादयः भीराः भयानकाः तेभ्यः भीः न विद्यते यस्य सः अभीर
भीः सर्वतोभयशून्य इत्यर्थः। अनेन नरपिरामावतारो बोधितः। अस्यैव अभिरभीरुत्वयि
म विशेषणं। अभिरभीरा भीराभीरा भीः। स्त्रियः ईरते ऋच्छते वा प्राप्नुवंती त्यर्थः। भीरु
पकर्मणि उपपदे इते कर्मण्युपनिःऋच्छतेर्मूलविभुजादित्वात्के वाभीर इति रूपं। अभितः
रायंति रक्षरक्षेत्याक्रोशंति ते अभीराः। अभीत्युपसर्गश्चैवोशब्दार्थक राय तेरादेव इत्या

संप्रति २

४

लेसुपिति योगविभागात्के अलोपे च अभिर इति रूपं। ततः अभिराश्च ते कर्मधारयः। अभि
रभीराः। पूर्वं सभयाः संतः शरणार्थिन इत्यर्थः। अभियं रातीति ददातीत्यभीरः। अभिरभीरा
णां अभीरः अभयप्रदः। अभिरभीराभीरः रणपराभूतानां रक्ष रक्षेत्याक्रोशतां शरणा
गतानां बिभीषदाक्षीनां रक्षणकर्तेत्यर्थः। भियं स्यति नाशयतीति भीसः। अकुतोभयं निर्भी
कमित्यर्थः। भा रूपे कर्मण्युपपदे स्यतेरादेच इत्यालं अतोनुपेति के भीस इति रूपं। अरीणां
समूहः आरं। भीसं च तत् आरं च भीसारं तद्बिभेति अंतर्भावितण्यर्थकात् बिभेतेः क्वि
पि रूपं। भीषयतीत्यर्थः। भीसारभीः। अथ पर एवमरि वृंदं भयभवनं करोतीत्यर्थः। अभि
रभीराभीरश्चासौ भीसारभीश्च स तथोक्तः। एवं दशावतारा व्याख्याताः॥ यद्वा। अभिर

भीरभीरितिपदछेदः। भीराः भयानकाः अभीराः परदारापहरणादिजभयशून्याः
रावणादयस्तेषां भीस्तस्यैव रभसो दास्येन वर्ततेऽनमनामकट्टीभवति सः अभीर
भीरभीः रामचंद्र इति अनेन ध्वनितं। अभिरभीराभीरभीसारभीरितिद्विती
यपदछेदः। अनेन कल्क्यवतारो बोधितः। अभीराः भयशून्याभाववंतः शूराः
अभीराः आइ इ बद्धयानकाः कातरा इत्यर्थः तेषां पीडाभियसारयतिप्र
यच्छति एवंभूताभीसारा म्लेच्छादयः तेषां भीर्यस्मात्। स वैयामेन भयजनेन का
म्लेच्छादयः तेपि भगवता कल्किनानिर्हादिता इति प्रसिद्धं। एवं व्याख्यानेन अ
दयदयइतिपदेनावृत्तिः कल्क्यवतिबोध्यो। एवं लीलावतारादशावतारधारी

५

स्वप्रकाशो व्यापकश्चिदानन्दघनो भक्तानुकंपी हरिः पायादिति स सारासिद्धयस्तान्
जनानं दृष्ट्वा परमकारुणिकः कश्चित्कविः प्रार्थयत इत्यर्थः। शार्दूलविक्रीडितं वृत्तं
॥ सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितं मि निलक्षणात्। यमका
लंकारः॥ आवृत्तवर्णस्तबकं स्तबकं दाकुर कवेः यमकं प्रथमं माधुर्यं माधुर्यवं
च सो विद्वारत्तिलक्षणात्। एवं मयोदिष्टं आसर्व स्पष्टता॥१॥

यद्वा अभावः पुंस्त्वान्पायात्॥ सः कः। येन करणो जातिविशेषः जनित इति शेषः। करणमुपलक्षणं॥
लणादयः सर्वेऽनुलोमप्रतिलोमजातिविशेषा उत्पादिता इत्यर्थः। वैश्यात्शूद्रकन्यायां करणो नाम जायते।
कीदृशः करणः। अरणः। न रणः संग्रामो यस्य स अरणः कलहशून्यः स्वस्वधर्मपर इति यावत्॥ पुनः स
कः। यस्य राणः रणः शब्दरूपं श्रुतिसमूहः तत्संबंधी रणो रणः प्रतिध्वनिः रणोवारणः रणस्य लोका
पवादध्वनिरूपस्य पडंचिन्हं वारयतीति रणोवारणः। अनेन यस्य श्रुतीपठतो वेदध्वनेर्जगदेनोनाशनं
ध्वनितं। पुनः स कः। येन रमा रमा रमरमा रा मार मासा रमा। दत्ता इंद्रादिभ्य इति शेषः। अयं भावः॥
येन रमा धुस्थाधर मा विष्णवे दत्ता रा अग्नी रुद्राय दत्तः मारः प्रद्युम्नः कृष्णाय दत्तः मरा मनुष्याय माय
कुबेराय वा दत्ताः। माः मासादयः सूर्याय दत्ताः रामाः रंभाद्यप्सरसः षष्टिसहस्रसंख्याकाः पुराण
प्रसिद्धाः त्रयस्त्रिंशत्कोटिदेवेभ्यो भोगार्हतया दत्ताः अरमाः राक्षस्यो निर्ऋत्याधिपतये बिभी
षणाय दत्ताः आसारो धारासंपात प्रयोजकत्वं दूंद्राय दत्तं। इदमप्युपलक्षणं। अन्यदप्यन्यस्मै

६ यथायोग्यं दत्तमिति बोध्यं। ननु स्वस्य तपोधनत्वाद् मादिशा दत्वा संभवएवातआह। श्रीमान् षड्
गुणैश्वर्यसंपन्नः कार्यजनकशक्तिमान् वा। नन्वेवं तस्यैवोस्याध्यवस्तुभोगः कुतो नात आह। जिष्णु
र्जननशीलः स्वेंद्रियनिग्रहपरः नन्वेवं तस्य कर्तृत्वमेव न स्यादत आह। विष्णुर्व्यापकः सर्वांतर्या
मित्वात्। पुनः सकः। उदयोदयः। उदधिकं अयोदयो शुभावहवि। ध्युदयोऽस्य यस्माद्वा उदये
न धर्मत्वादनेन तपस्यादिद्वारा उदयः शुभफलयोग्यत्वं यस्य यस्मादिति वा। पुनः सकः।
अदयदयः अदयेषु हिंस्रादिषु दया यस्य सः। यद्वा अदयान् सिंहव्याघ्रादीन् ब्राह्मणादि
घातुकान्व्याघ्रांल्लिखंड्यंतीत्यदयदाः तान्वाति आनाति अनुगृण्हाति वा स तथा। पुनः सकः
दायोदयोदेदयः। दायोदयं गोत्राभिवृद्धिं ददातीति दायोदयोदः स चासौ विश्वकामस्त
स्मिन् दयते आसक्तो भवतीत्यर्थः। कदाचित्कामवशात्परस्त्रीं दृष्ट्वा मोहितः सन् हस्तेन मु
ष्टिं गृहीत्वा गायत्रीमनुजगामेति पुराणप्रसिद्धं। पुनः सकः। अभिरथी राभीरथी

रसीः। अभिलाः रःकामः भीराः ब्राह्मणादयः अभीराः क्षत्रियादयः तेभ्यस्तेषां वाभीर्यस्मा।
सबोद्धः। अभिरभीराभी रभीणस्य सारा उत्कृष्टा यं च त्वरूपा भीर्यस्मात्सः। तथा चानेन सर्व
वर्णाश्रमधर्मपालकत्वं ध्वनितमित्यर्थः। इदं चार्थकथनं दिक्प्रदर्शनं। एकैकस्य तु पदस्य
शतमर्थान्वक्ष्महे। तथापि हि ठद्वृत्तिश्लेषसहस्रं लक्ष्यमेव वा॥१॥ ॥ दुमांगाढवि चा बुचा ध
गउिचा फोदालिचा वोरदा चोधासी नल चोरगाढवस्स वा मा चोदहारवो वलाः॥ होत्थाणा
ढवगं उगां उमणि चा कुत्रा मुअ उंगना पानुत्वां यजमान दान इदने देयात्समृद्धिं चिरं।
॥२॥ अस्यार्थः। हे यजमान। अंगनाअंगैः षडंगैर्युक्तः ना पुरुषः शाकपार्थिवादित्वात्समा
सः। सांगवेदयुक्तपुरुष इत्यर्थः। त्वां पातु रक्षतु। अथ दानदहने दानं ददाती दानदः तस्मै
तुभ्यं चिरं समृद्धिं देयात् ददातु। कथं भूतः अंगना। दे। अमा। द्राब्देन बुद्धिः न द्विपये। न हि
विधते मा परिमितिर्यस्य सः। अपरिमितज्ञानविषय इत्यर्थः। दं कलत्रं च बुद्धिश्च ति बरा

श्री

८ माङ्गमानेक्किबुंनमेमन्। पुनः कथंसः। गाढविचानुचा। गाढः उत्कृष्ट इतियावत्। विःपक्षी गरुडेयस्यसः। गाढविर्विष्णुः तस्यचरणः। चरणेचः प्रकीर्तितइतिशाश्वतः। गाढविचात् विष्णुचरणात् गलिताः आपोजलानि यस्मिन्स गाढविचापूः समासांतविधेरनित्यत्वान्न समासांतः एवंभूतश्चासौ उक्षः शंकरस्तस्यचाः चूडा यस्मिन्सः गाढविचानुचाः चापद्धूत्रा नि शामनयोरिति धातोश्चायनं चाइति भावेक्विपि लोपो व्योरितियलोपे चाइति रूपं। पुनः कथंसः धगडचाः। दहति भस्मीकरोतीति धक् अग्निः त्रेताग्निर्वातस्य भडुः उद्यमः आधिमंथनीयपक्षेसत्वसंस्थारूपो चायस्मिन्सः। धगडीकालपुरुषः सत्वसंस्थादिप्रकारः तस्य चाः दृष्टादृष्टिनीयपक्षेकर्माभिनिवेशो वा यस्मिन्सः। पुनः कथंसः। फेघालिचाः। झंझावाते फकारस्यानर्थानिष्फलभाषणे इत्यभिधानं। फं निष्फलभाषणं उद्दालयंतिखंडंतीतिघा दालिनः। वारणार्थी। कादलधातोर्णिनिः। सत्यभाषिणः साधवः तेषांसत्यवेदधर्मे

दिनाथाः स्तनाय यस्मिन् सः। पुनः कथं सः पोरटाचोधासी। पद्धकारः प्रकटपथे इति वररुचिः।।
पः प्रकटपथः औपनिषद मार्गः उभयरक्षणं आवरणमिति यावत्। रटश्च भाषणं। तौउ
रटौ पोरटयोः अबोध्यं अनल्पीभावः आकुलत्वं तस्य आसनं आसः आवृस्थासनः अस्ति यस्मि
न्निति सा सशब्दं तान्मत्वर्थीय इतिरनिर्बोध्यः। पुनः कथं अतनः। इनलचोरगाढवसुवा। इकार
उच्चाने का म इति वररुचिः। इत्याब्देन मदनः तस्य नताः शराः संमोहनादयः उन्मादस्तापनश्च
स्तंभनः शोषणस्तथा। संमोहनश्च कामस्य पंचबाणाः प्रकीर्तिताः। इनलान् कामबाणान्
चोरयंतीति चोरयंतीति इनलचोराः साधवो श्रुत्वा चारिणः ते अंगगाढबलिष्ठं वेमानसेनिष्पन्नं।
मानसे वरुणो वाते वकारश्च प्रकीर्तित इति एकाक्षरः। संतमः अज्ञानं गाढं तेव स्त्राब्दस्य
कर्मधारयः नक्तं संक्षमुदाहृतं। अविद्यालक्षणं तमः न घातिवापयति हरीकरोतीति स्वं तभ्यां
वितथ्यथावागतिगंधनयोरिति धातो क्विपि रूपं। पुनः कथं सः मायोदहो। मायाः चोदः

न५

६

लक्ष्मीकार्दकः भेरणारूपः कार्याभिनिवेशः तंहंतिजहातीतितथा । पुनः खोपला । खश
ब्देनेंद्रियाणिप्रवर्तेनेपुंसकेभावेकिंपिहखोनपुंसकइतिइखसंचप्रवनंउहतिरूपंइदं
सर्वेभूर्वत्रापिबोध्यं । तथाचैतेःरेषःउरक्षणेपेवंतनेखावः तोशब्दवर्वोशब्दबहुवचने
प्राणिनःतेषांबंबलं आणविधिलक्षणेनेलातिसंपादयतीत्यंतसर्वविलएपर्यालाभ्यादनेइ
तिधातोःकिंपिरूपं । पुनःसकः होल्यागादवगंडगांडमणिचाः । कुलहिंसायांहोलनेहोलः
होलस्यभावः होल्यंहिंसात्वं । गत्यर्थस्यहोलतेरनेकार्थत्वात्स्यात् नोहिंसार्थोबोध्यःते
स्यअगारंआलोडनंनगारं अगारंअनालोडनंपरित्यागः येषुतेहोल्यागारः साधवः
नानूवालिवसतिरान्त्वेनपरिरक्षतिसः होल्यागादवः पर्वतः यतःसाधवः पर्वतानिवा
सिनः होल्यागादवस्यपर्वतस्यगंडाः गंडकाः । गंडंगंडस्थलंप्रोक्तंगिरेर्गंडकमिवचेतसि
धानात् गंडानामिमेगांडाः गंडशैलाच्युताः स्थूलोपलाः होल्यागादवगंडस्यगांडाः तत्रवे

मणयः स्तभेदाः तेषां चाः भूजा यस्मिन्सः। पुनः। कुत्राः। कुंधरां त्रायते रक्षतीति कुत्रः।
वीरस्य कः त्रेऽ पालुने इस्य स्याक्किं तत्वादिति रूपं। पुनः कथं सः। मुअहं मोहनं मुहं मोहः अ
मः तं भ्राटयति दूरी करोतीति मुअहं ॥२॥ मूल ॥ राजा राजार्चितांघ्रेरनुपचितकलो यस्य चू
डामणिस्त्वं नागा नागात्मजार्द्धं नभसितधवलं पद्मपुर्भूषयंति ॥ मारा मारातिलीभूः नतिरि
तियमिनां येन वाराहि मारः सभाः सभाः अनुत्वारुणाकिरणेर्विभा पातु विभ्रान्तिनेत्रः ॥३॥
अस्यार्थः। सः त्रिनेत्रः शिवः पातु। सकः। अजार्चितांघ्रेः अजया भवान्या अजेन ब्रह्मणा
वा पूजितचरणस्य यस्य शंकरस्य अनुपचितकलः अपरिपूर्णकलः राजा चंद्रः। राजा
प्रभो नृपे चंद्रे इति कोशात्। चूडामणित्वं शिरोभूषणत्वं प्राप्य। पुनः सकः। नागाः स
र्पाः भसितधवलं भस्मधवलं नगात्मजार्धं हिमाचलकन्यार्धं यद्वपुः यच्छरीरं न भूषयंति
तिन किंतु भूषयंतिस्मेत्यर्थः। पुनः सकः। यमिनां संयमिनां साधूनां मतिः बुद्धिः रामा

17

१

रागिणीरामासक्तामात्मदिति हेतोः येन यं करेण मारः मदनः प्रदाहि भस्मीकृतः पुनः क
थंभूतः सः। समाश्येन सूर्यैश्चाङ्गुन्नः प्रेरितो यो रुणः तस्य ये किरणाः तत्तुल्याः समाः
जटाः। जटाः समा इति यदङ्घ्य पादे ने हजपद्धचं तेदृति केचित्। तद्व्याहारोनमाः वि
भ्रम्। ३॥ मूलं॥ वान्धारेन्दुप्रथमघनोदधिपतिः कुप्रेन्दुजानिर्गलेक्रौणाउरुदुरः सरेड
हतरये वेयकभाडरं॥ उद्भिन्नद्रुः कास्थिधकत्रिदिविजभेडाङ्घ्रिजिनाघपदः सत्ता
रंभुमदंभुदालिगलरुम्देवो मुदे वो मृडः॥४॥ अस्यार्थः। सदेवो मृडो वः मुदे ऽरं स्तादिति
न्वयः॥ स सकलमुनिमनुजखगमृगादिजंतुजातमोक्षदातृत्वेन प्रसिद्धः। दीव्यति क्रीडते ऽर
ति देवः। सकलभूतांतर्वर्तितया सकलप्रपंचनियामकत्वात्सकललोकैकनाथ इत्यर्थः। त
त्रोसय त्रकिं प्रमाणमिति चेच्छ्रुणु। एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मा। अ
मीध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्चेति एष साधुकर्म कारयतीति

श्रुतिप्रमाणं। तयोर्हि तेभ्य विना न लाभस्य चलितुमशक्यत्वात्सकलाद्भूतां गतवर्तितया लेशेन क्रमप्रपंच-
मकत्वमुक्तं। मडः। मडयति सुखयतीति मडः। अंतर्भावितण्यर्थादिगुपधेति कः। गिरीशो गिरिशो मड इत्य-
मरः। ईदृशः शिवः वः युष्माकं मुदे प्रीत्यै ऐहिकामुष्मिकसंपत्सारत्वादि निखिलश्रेयःप्राप्तिजनितहर्षाय
भूयादिति शेषः। अमरोह्यर्णइत्यमरः। अरंगादं। अरं शीघ्रं गैरथांगस्य शीघ्रशीघ्रमयोरिद इति शाश्वतः। स्तात् भूया-
त्। इत्थेयमाशीः शारणस्यते। आशीर्नाम अप्राप्तस्य प्राप्तुमिष्टार्थस्य शंसनं। ननु भदिवू धातोर्निष्पन्नो दे-
वशब्दपर्यालोचनया परमात्मत्वात् नित्यविज्ञानानंदात्मकस्य निष्कलं निष्क्रियं शांतं निरवद्यं निरंजन-
मिति श्रुत्या निर्विकारत्वनिर्धर्मत्वप्रतिपादनात् कथं नाम कथं तस्य संतोषप्रदानत्वादिधर्मवत्वमि-
ति चेन्न। निर्विकारस्य परमात्मनः अघटितघटनासमर्थाविद्यारूपोपाधिवशात्कल्पितानां धर्माणां
आकाशस्य घटत्वावच्छिन्नघटरूपोपाधिवशात्मलिनत्वादिधर्माणामिव परमात्मनो न कश्चिद्दोषः।
एवं सति सकीदृग् इत्याकांक्षायां श्लोकोक्तविशेषणक्रमेणाह। नाम्नारेडूध्वजधकः। वाः अलं च रंतिग-
च्छंति भत्सयंतीति वावाश्वाराः। बरनेः कर्मण्यालिरूपमेतत्। मत्स्याः तेषामिट् ईश्वरः श्रेष्ठमकर इत्यर्थः।

१० स च ध्वजे यस्य सः मकरध्वजः मन्मथः रतिपतिरिति यावत्। पुष्पधन्वा रतिपतिर्मकरध्वज आत्मभू
इत्यमरः। तं हन्ति भस्मीकरोतीति वा मकरध्वजहन्। हन्तेः क्विप्। एवमुत्तरत्र कुध्रेन्द्रजादोरूप
ध्वं। घनतरमीनकेतननर्दितां तद्दर्पोत्पाटनपटुरित्यर्थः। पुनः कीदृशः। ध्वजोडुधिपतिः। उडूनामधि
पतिश्चन्द्रः ध्वजः उडुधिपतिर्येन सः। सुधाकरकमनीयकलावतंसजटाजूट इत्यर्थः। पुनः कीदृ
शः। कुध्रेन्द्रजजानिः। कुर्भूमिः गोत्रा कुः पृथिवी पृथ्वी स्मरः। तां धारयन्तीति कुध्राः। महल विभुभ्रा
दिलाल्कः। पर्वताः तेषामिन्द्रः अधिपतिः हिमवान्। तस्माज्जाता पार्वती। पञ्चम्यामजाताविति ड्
सा जाया यस्य सः कुध्रेन्द्रजजानिः। जायाया निङिति समासान्तनिङादेशः। सकलभूधरधुरंधर
हिमवदभिधानभूधरकन्यकारमण इत्यर्थः। अनेन सशक्तिकत्वात् सर्वशक्तिरूपपादिता। पुं
गणेशः। गणानां ईदृक्प्रमथाधिप इत्यर्थः। किंभूतो यो वि। गोराडारूढः। गवां पट्टनाराट्। अथ नाग
वां गोपुरे हि लीभुव पभ्रे भुवा राजत इति गोराट् वृषभः तमारोहतीति अधितिष्ठतीति गोराडा

ऋषभयत्र। गोर्नादस्य बलीवर्दे किरणक्रतुभेदयोः। स्त्री तु स्याद्दिशि भारत्यां भूम्नौ तु सुरभावपि।
न स्त्रियोः स्वर्गवज्राम्बुरश्मिदृग्बाणलोमसु। इति विश्वः। अनंतस्य विशेषातिशय प्रकाशमानत्व
पराजाधिरूढ इत्यर्थः। पुनः किं। उरःसरेंद्ररुचिरग्रैवेयकभाक्। उरसा सरंतीति गच्छंतीति उरःसराः
सर्पाः तेषामिंद्र उरःसरेंद्रः फणिराजः तस्य ग्रीवायां भवं ग्रैवेयकं। कुलकुक्षिग्रीवाभ्यश्च इत्यनेन ढकञ्
प्रत्ययः। कंठभूषणमित्यर्थः। अनंतमुकुट इति उरुतरं चतुरं ग्रैवेयकंचनेन भ्राजते शोभत इति सः।
तिमिरनिकरधिक्कारयदुज्वलन्मणिशिखफणाधरराजविभूषित इत्यर्थः। पुनः किं। उद्विदुकाउ
रूनां इंद्रचंद्रः तस्य रुचिवरुकयस्य सः। गाढांधकारस्य निर्वापणनिपुणनरशरच्चंद्रचंद्रिकाधवलर
त्यर्थः। भस्मांगरागादि इति भावः। पुनः किं। नरकास्थिधृक्। नरोऽस्थानस्य कं शिरः तस्य अस्थि
कपालं धर्जति बिभर्ति अनेकार्थत्वेन धरणार्थकात् धृञ्तेः क्विपि रूपं। नरकास्थिधृक्। सहस्तम
पूरवमयूखोन्मीलितकमलमुखचतुष्टयसमेतजगत्सृष्टिकारणब्रह्मकपालधारीत्यर्थः।
नराणां मनुष्याणां कानि शिरांसि। अग्रे सर्ववत्। कोऽस्मात्मनि को कोके कुसुखशीर्षजले पुक

११ मितिविश्वः ॥ त्रिदृग् ॥ तिस्रो दृशो यस्य सः त्रिदृक् । सूर्यचंद्राग्निलोचन इत्यर्थः ॥ पुनः ॥ इभेन्द्रार्द्रजि
नाघघुघुदः इभानामिंद्र इभेंद्रः करिश्रेष्ठो गजासुरः तस्य आर्द्रं च तत् अजिनं च इभेन्द्रार्द्राजिनं अ
घं आसो घुघुदः अघघुघुदः इभेन्द्रार्द्राजिनमेवाघघुघुदो यस्य सः पीडितसकललोकस्य राक्षस
श्रेष्ठस्य गजासुरस्य चर्मांबरधारीत्यर्थः । आर्द्राजिनं चर्म कृत्तिः स्त्रीत्यमरः ॥ घविरिति पाठे अजि
नेन अघघविरस्येत्यर्थः ॥ पुनः ॥ अंबुमदंबुदालिगलरुक् ॥ संचितसलिलघनपंक्तिनीलवत्
नीलकंठ इत्यर्थः ॥ एताहृग्गासाधारणगुणवत्सहृदयसकलसज्जनसंदोहानुसंधीयमाननि
जमहिमा श्रीभवानीशंकरो वो निरंतरं आयुरारोग्यैश्वर्यसाहित्यजयसत्कीर्तिसुपुत्रधनक
नकवस्तुवाहनादिसमृद्धिं ददात्विति आशीर्वादः कविप्रार्थ्यः ॥ ४ ॥ मूलं ॥ सत्यासत्त्वमनोज्ञ
वक्त्र नरकछेदीहिद्विजेंद्राश्रयो मुक्तानेकमुखोद्भवास्यदलमश्रीर्यभसं राजते । या गंगां च
बिभर्ति यश्च स शिवो यः कामदेहाश्रयः सद्यः साम्यमयं भयानुभवतां कृत्तेन रुद्रेण वा ॥ ५ ॥

अंब

अस्यार्थः। अयं भवतां सघः तेन कृष्णेन अथवा हरिद्रेण साम्यं प्रयातु। इतियोजना। तत्रादौ कृ
ष्णपक्षे संयोजनं दर्शयति। कीदृशः कृष्णः सत्यासक्तमनाः। सत्यायां सत्यभामायां आसक्तं म
नो यस्येति। पुनः। प्रवृद्धनरकच्छेदी। प्रवृद्धश्चासौ नरकश्च तं नरकासुरं छिनत्तिसः। पुनः। द्विजेंद्र
श्रयः। द्विजेंद्रो गरुडो आश्रयो वाहनं यस्य सः। पुनः। युक्तानेकमुखोद्भवास्पदं। युक्तो योगसं
पन्नायुक्तो अनेकमुखश्चतुर्मुखः तस्य उद्भवः उत्पत्तिः तस्यास्पदं। यत्र अलंश्रीः संराजतो
अलं अत्यर्थं श्रीर्महालक्ष्मीर्यदाधारतया सम्यक्राजते। यश्च अगं गोवर्धनं गां भुवं च बिभर्ति
यश्च सशिवः। शिवेन कल्याणेन सहितः। यश्च। कामदेहस्य मदनशरीरस्य आश्रयः। तदुत्प
त्तिजनकत्वादिति। अथ शिवपक्षे। कीदृशः शिवः सत्येति। स्वीसत्यां पार्वत्यां आसक्तं मनो यस्य
सः। पुन॰ प्रवृद्धनरकच्छेदी। एतेनस्य प्रसादेन। कं नरकं प्रवृद्धं प्रवृद्धं च तं नरकं च नत्वपं च मं शिरः
न छेदी। पुनः। द्विजेंद्राश्रयः। द्विजेंद्रः इंदुः। तस्याश्रयः। चंद्रमौलिरित्यर्थः। पुनः। युक्ताने

23

१२ कमुखोद्भवास्पदं। युक्तो योगी सेनाधिकार्ये नियुक्तो वा अनेकमुखः षडाननः तस्योद्भवः तस्या
स्पदं जनक इत्यर्थः। सकः अलं श्रीर्यत्र संराजते अतिशयेन श्रीः शोभा यत्र शिवे संराजते शोभा
विशिष्ट इत्यर्थः। यश्च गंगां शिरसा बिभर्ति। यश्च सशिवः शिवया पार्वत्या सहितः पार्व
तीपतिरिति यावत्। यश्च कामदेहाश्रयः। कामं घतिखंडयति सा कामदा सा चासौ ई लक्ष्मी
च कामदेहा तस्या आश्रयः वैराग्यशालीत्यर्थः। अथ संघपक्षे सत्येति। सत्ये यथार्थभाष
णे आसक्तं मनो यस्य सः यथार्थभाषीत्यर्थः। पुं० प्रचंडेति। प्रचंडः हिंसकः नरः पुरुषः त
स्य मस्तकं छिनत्ति सः दुष्टजननाशीत्यर्थः। यद्वा। निषिद्धाचरणजन्यं कुलनरकस्य विहि
तमात्राचरणात् छेत्ता सद्धर्माचरणशील इत्यर्थः। पुनः द्विजेति। द्विजेशानां विप्रश्रेष्ठा
नां आश्रयः पालकत्वात् पुनः। युक्तः योगसंपन्नः पुनः अनेकमुखो अर्हन्त तदुद्भवस्या
स्पदं स्थानं प्रजोत्पत्तिकारणत्वात्। सकः यत्र संघे श्रीः कांतिः अलं संराजते शोभते।

यश्च योगं अष्टांगमैथुनात्मावं यष्टायः गंगलपार्तिं यष्टा अगं पवर्नं धर्मिष्ठस्थिरत्पथीनत्वा
त्सर्वस्त्रिनीनां गां च वाणीं विभर्ति। यश्च सशिवः सम ंगलः। यश्च कामदेहत्रयः। का
मं मनोरथं ददातीति सा कामदा बाईहातस्याः आश्रयः सकलेच्छापूरकत्वा सतां दृश्यो
भवतां संघः कृष्णेन रुद्रेण वा सममतां प्रयातु। इति कविप्रार्थना। ५।। वीडे कापूरसूपा
रीलवंगापानचूर्णकं।। विवाहं व्रतबंधं च मादलं कहलानुजं।। ६।। अस्यार्थः। कहला
नुजं वीडे इत्यन्वयः। कस्य सुवर्णस्य हलो यस्य स कहल बलभद्रः तस्यानुजं श्रीकृष्णं
वीडे विशेषेण स्तौमीत्यर्थः। मर्द्धे विते जले कायेसुखे ब्रह्मणि मारुते। कामे काले सुव
र्णे च कस्त्रा ब्दे द्रुविणेधुना विनिएकार्थीन्। कीदृशं कहलानुजं कापूरस्सूपारिलवं।
कस्य सुखस्य आसमंतात्सम्यक् पूरः प्रवाहः तं सूते उत्पादयति सा कापूरसूः संपत्।
तां पाति रक्षंतीति कापूरसूपाः ते च ते अरयश्च दुर्योधनादयः ते बाईः लक्ष्मीः नालातिग

१२

ल्हातिसः अर्जुनः तस्य वंमानसंविधते यस्मिन्सः ता दृशं। इकार उच्यते कामो लक्ष्मीरीकार उ
च्यत इति एकाक्षरः। मानसेवरुणो वा तेवकार अप्रकीर्तितिइति एकाक्षरः। पुनः। गापान चूर्ण
कं। गधं तिपरमात्मानं आनंतिनेगाः ज्ञानिनः तेषां नपाः अयाः असंरक्षकाः दुष्टाः कंसादयः
तेषां ग्रनाः प्राणाः तान् चूर्ण चूर्णयति असौ तादृशःतं। पु०। विवाहं। विर्गरुडो वाहो वाहनं य
स्यतं। पुनः०। व्रतबंधं। व्रतं कृच्छ्रचांद्रायणादिनस्य बंधो यस्मिन्सः तं। यदुद्देशेन व्रताचरणमि
त्यर्थः। यद्वा। व्रतं सज्जनपाल न लक्षणो नियमः तं बध्नाति स्वीकरोतितं। पुनः। मादलं। मा ल
क्ष्मीः सेव दंकलत्रं नतल्लालिग न्हालीतितं। दंकलत्रं च बुद्धिस्य घे देशान्मेव दातरीत्येकाक्षरः। ई
लक्ष्मीवनकमलकर स्हरणं दही नुंधकक्ष मोपापठी लाडूढोकलघीवलां घनवडी खाजांजुरा
ली रुचिः॥ मंडासाकर खंडनो विविधुनाक्षीरा वसाातुल्य मां सुंफंगनडिन्निभांग वसनो
व्याः सेवकं सारवान्॥ ७॥ अस्यार्थः। हे लक्ष्मीवनं त्वं मां सेवकं अव्याः रक्ष। कादृशस्त्वं॥

कृतकुः। कुं कोः पृथिव्याः उः अवनं येनासौ कृतकुः। पुनः कीदृशः। असूः। सूयते उत्पद्य
ते सौ सूः। न सूः असूः। जन्ममरणादिशून्यः। पुनः। रणदहीन्। रणं संग्रामं ददतीति रणदाः
शत्रवः। तान् हिनस्तीति रणदहीन्। शत्रुहेत्यर्थः। हिनस्तेः क्विपि सौ सांतमहन् इति दीर्घे संयो
गांतलोपेन स्यासिद्धत्वान्नलोपो नेति बोध्यं। पुनः दुधकः। दुं दुःखं पापं परितापं वा दहतीति
दुधकः। दुःखनाशक इत्यर्थः। पुनः क्षमः। क्षमाऽस्यास्तीति क्षमः। अर्शआदिभ्योऽजित्यच् प्रत्ययः।
क्षमावानित्यर्थः। पुनः पापडी। डलयोरभेदात् पापं लापयति द्रवीकरोति नाशयतीति। द्रवी
करणार्थक लीङ् धातोराधृषीयत्वेन णिजभावे क्विपि रूपमिदं ननु लुनातेरिति बोध्यं। सपा
पडीः। पापनाशकः। उक्तं च। बवयोर्डलयोश्चैव रलयोः शषयोस्तथा। अभेदमेव वांछंति
अलंकारविदो जना इति। पुनः इलाटः। इलायां पृथिव्यां अटतीति इलाटः। सदाहं द्विज
रूपेण विचरामि महीतले बहवो मां न जानंति मम मायाविमोहिता इति भरत वचनात्।

१४ पुनः। विविभुनाऊढः। वीनां पक्षिणां विभुर्गरुडः तेन ऊढः। पुनः अकलधीः। अकं दुःखं
घ्नती सकलधीः दुःखानि घ्नंतः। अनोपसर्गाकारलोपः। अवगतं लांछनं यस्य सः बलां
छनः तत्संबोधनं बलांछन अमरएवबनां ते सीतांजहो। सच किं न वेत्ता। सा किं न मुग्धा। ब
लीयसी केवलमीश्वरेच्छा। पुनः बडी। डलयोर्बवयोश्चाभेदात् बली। बलमस्यास्तीति
बली। पुनः। खजांबुदालीरुचिः। खे आकाशे अजंति गच्छंतीति खजाः गगनचराः ते च ते
अंबुदाश्च तेषां माली पंक्तिः तस्याः रुचिरिव रुचिर्यस्य सो घनश्याम इत्यर्थः। पुनः।
मंडसाकरखंडनः। डलयोरभेदात् मल्लाश्चाणूरादयः सकारयोरभेदात्। तेषामाकाराः
इच्छाः। तासां आकरः समूहः तं खंडयति नाशयतीति मंडसाकरखंडनः मल्लेच्छासमू
हनाशक इत्यर्थः। हे क्षीरावस। क्षीरे क्षीरसागरे आवसः आवासो यस्य सः। तत्संबु
द्धौ हे क्षीरावस। हे अतुल्य। नास्ति तुल्यो यस्य तत्संबुद्धौ हे अतुल्य। कीदृशं मां। सा मु।

असुभिः प्राणैः सह वर्तमानं। पुनः कीदृशः सः। अलितडिन्भिभांगवसनः। अंगं च वसनं च

अंगवसने अलिश्चतडिच्च अलितडितौ तयोर्निभे च निभे यस्य ते अलितडिन्निभे तादृशे

अंगवसने यस्य सो अलितडिन्निभांगवसनः। पु० सारवान्। सारो बलमस्यास्तीति सा-

रवान्। पालनसमर्थः॥ ७॥ यो व्योमाडिनगो हरी डुडुपगोयुग्मः क्रगश्रोपपौभीमर्भ्वर्य

सुकीरमारतरसो नाप्यकुञ्जसीनकः॥ घोसच्च मेव वगामृपत्तसलिलजो वाधिश्चिपोष्टाधदो स्व-

राघोगध सिवाडधाद्मतदः पायात्स वः कंदभः॥ ८॥ अस्यार्थः। स कंदभः वः युष्मान् पायात् अ-

र्थात् रक्षतु। कंददति ते कंदाः। कमिति मां ताव्ययो पादानाहूदाने रातो नुपेतिकः। मेघाः तेषा-

माभेवाभा यस्यासौ कंदभः। कृष्ण इत्यर्थः। सकः। यो व्योमाडिनगः। व्योम्नि अटंति गच्छं-

ति ते व्योमाटः पक्षिणः तेषां इनः स्वामी गरुडः तेन गच्छतीति व्योमाडिनगः। पु० अह-

रीडुडुपगोयुग्मः। अन्हांईद् अहरीट् उडूनि पातीति उडुपः। अहरीट् च उडुपश्च अहरी-

१५ डुडुपौ सूर्यचंद्रौ गोयुग्मं नेत्रयुग्मं यस्य सो ऽहरी डुडुपगोयुग्मः पुनः० कगध्रः । कुश्च अगश्च
कगौ कगौ धरतीति कगध्रः भूभृद्धरधारीत्यर्थः । पु० अपभीः अपगताभीर्यस्मात्स अपभीः ।
पुनः० भीमर्भ्वर्यसुकीः । ऋभ्वणां देवानां अरयो ऋभ्वरयः दैत्याः भीमाश्च ते ऋभ्वरयश्च भीम
र्भ्वैराणां असून् प्राणान् कुनातीति भीमर्भ्वर्यसुकीः । दैत्यनाशक इत्यर्थः । हिंसार्थात् क्रूणातेः
क्विपि कृ नइ दितीत्वे वोरुपधाया इति दीर्घे रूपं । पु० रमारमरसः । रमारतेऽस्मिन् रसो यस्य स इति सः । ल
क्ष्मीरागासक्तः । पु० नाभ्यब्जुआसीनकः । अप्सु रोहति उत्पद्यते अब्जं कमलं नाभौ अब्जं
नाभिकमलं तस्मिन्नासीनः कः ब्रह्मा यस्य सो नाभ्यब्जुआसीनकः । पु० घोसच्चमूवगाम्य
पत्सलिलजः । घवि सीदंति ते घोसदः तेषां चमूः तया देवसेनया अवगाम्ये ये चरणे सलिल
जे पंकजे यस्य सो सुरपूज्यपाद इत्यर्थः । पु० वार्धिस्वपः वार्धौ समुद्रे स्वपितीति सः । समुद्र
शायीत्यर्थः । पु० अष्टार्धदोः । अष्टार्धं चत्वारः दोषः हस्ता यस्य सः । चतुर्भुज इत्यर्थः । पु०

आघः। मोदो भवः। पु०। अगदी। गदस्यास्तीति गदी। व्रीह्यादित्वादिन्। मत्वर्थीयइनिः। पु०। अ
मिवाद्। असिं खड्गं वहतीति सः। खड्गधारीत्यर्थः। पु०। अमतनदः। अमतं ददातीति अमतदः।
मोक्षप्रद इत्यर्थः॥८॥ यावत्तोयधराधराधरधराधाराधराभूधरा यावच्चारु सुचारु चारु
चमरं चामीकरं चामरं॥ यावद्रावणरामरामरमणं रामायणं श्रूयते तावद्भोगविभोगभोगभ
वनं भोगाय ते निःस्वयं॥९॥ अस्यार्थः। हे भोगविभोग ते भोगभवनं नित्य राः भोगाय अस्ति
नि सराः
त्वन्वयः॥ भोगेन धनेन विशिष्टो भोगः सुखं यस्य स भोगविभोगः। तत्संबुद्धौ हे भोगविभोग इ
भोगः सुखे धने चैवेति विश्वः। यद्वा संबोधने भोइत्येकं पदं। तथा च भोगविभोग गेन गीतेन
विरोधेन भोगः सुखं यस्य तत्संबुद्धौ गविभोगेति। गं गीतं गस्तु गंधर्वे गणनायक गीतयोरि
त्यनेकार्थः। तेन च भोगभवनं भोगावच्छेदकं शरीरं भोगाय सदा तावदस्तु॥ अस्तित्यत्राध्या
हार्यं। यद्वा। भोगविभो इत्येकं पदं। तथा च भोगेविभुस्तत्संबुद्धौ हे भोगविभो भोगसमर्थेत्यर्थः।

31

१६ गभोगे तिष्ठसंबुध्यंते। पूर्ववदर्थः। तेन वत्सभवनं गृहं भोगाय आनंदाय मावन्निस्यश्रः अस्तु।
यावत्तोयधराः समुद्राः तिष्ठंति तथा यावत् धराधरधराधाराः तिष्ठंति धरायाः अधरः अ
धोभागः तं धरंतीति धराधरधराः शेषादयः तेषां आधाराः कूर्मादयः यद्वा धराधरधराये
आधाराः अधिकरणभूताः शेषादयस्तत्सर्वः। तथा यावत् धरा पृथ्वी तिष्ठति। यावदत्र
धराः पर्वताः तिष्ठंति। यावच्च आमरं अमरसंबंधि चामीकरं सौवर्णं चमरं तिष्ठति। माहेंद्रा
ज्ञोपलक्षणमेतत्। यावत् माहेंद्राज्ञे तावत् तव भोगभवनं भोगाय अस्त्विति तात्पर्या
र्थः। किंविशिष्टं चमरं सुचारु चारु। सुचारुषु रमणीयेषु वस्तुषु चारु रमणीयं स्वाराज्यचि
ह्लादिति भावः। प्रथमं चादिविविशेषणं भवनपदेन संबध्यते। तथा। यावद्रामायणं
श्रूयते। किंविशिष्टं रामायणं। रावणरामरामरमणं। रामः मनोहरः सचासौ रामश्च
सः रावणश्च रामरामश्च रावणरामरामौ ताभ्यां रमणं मनोहरं। ननु लोकद्वेषिणा रा

रावणेन नरामायणस्य रमणीयत्वं किंतु लोकाभिरामरामेणैव तथा च वर्णनीये रामराम

स्य वरामायणरमणीयत्वे हेतुत्वं वर्णनीयनरावणस्येति रावणग्रहणमनर्थकमिति चेत्स

त्यं। केवलरामस्य रामायणरमणीयत्वप्रयोजकत्वेपि रावणसंबंधिसंग्रामादिकथाया अ

पि रामायणरमणीयत्वे प्रयोजकत्वाद्रावणस्यापि रामायणरमणीयत्वे प्रयोजकत्वं रा

नक्रूप५ वणहननं कपाश्च वणस्यापि नरासंतोषापादकत्वादपि नरावणग्रहणमनर्थकमिति

हंकनीयं। रामणराम रामरमणमिति पाठे रमयतीति रमणः सुचूनदंतप्रकृतिक टावंता

द्रमणशब्दात्स्वार्थे प्रज्ञाद्यणि आदिवृद्धौ ङीपि च रामणीशब्दो बोध्यः। नंद्यादित्वप्रत्ययां

तात्प्रज्ञाद्यणि गौरादित्वान्ङीपि रामणीति वा बोध्यं। तथा च रामणी ज्ञानकीयस्येति बहु

व्रीहिः। रामणीशब्दो स्त्रियाः पुंवदिति पुंवद्भावो बोध्यः। रामणरामः स चासौ रामश्च र

मणरामरामः तेन रमणमित्यर्थः। अत्र च रामपदमनर्थकमिति शंका चेतिबोध्यं॥१॥ श्रीः

भवेतांभवतांभूत्यै पार्वतीपरमेश्वरौ ॥ वाहीकृतमहाधेनुगणाधिपविनायकौ ॥ १० ॥ पार्वती
पश्चरमेश्वरश्चतौ शिवविरूढ इत्यर्थः । महाधेनुगणाधिपः नंदी । विनायकः पक्षीन्द्रः गरुड इत्य
र्थः तौवाहीकृतौ याभ्यां ताविल्यर्थः ॥ १० ॥ एकबालेनरामेणरावणस्यरणेशिरः ॥ मंदारकुसुमा
सक्तस्रंगमाला विराजितं ॥ ११ ॥ आलावि । लुञ्छेदने । छेदितमित्यर्थः ॥ ११ ॥ कदावियोगोरथ
पादनाम्नोः कोदेवराड्दुर्गाभ्यतिकेनवन्हिः ॥ मनोभवः किंकृतईश्वरेणतत्रोब्धिजोजाः सलिले
नदग्धः ॥ १२ ॥ अंतर्लापिकेयं । यथाक्रमं प्रश्नचतुष्कस्योत्तराणिरत्नाविस्यादि ॥ १२ ॥ प्रश्नार्थे
किंपदंप्रोक्तंनरंसंबोधयाधुना ॥ भगवान्कोजगत्स्वामी कोवागायतिकिंनरः ॥ १३ ॥ अंतर्ला
पिकेयं ॥ चतुर्णां प्रश्नानांयथाक्रममुत्तराणि किंन्नर इति । यथा । किं । नः । अः । किंन्नरः ॥ १३ ॥
आपादलंबिनी माला कंठेरामस्यसीतया ॥ भ्रमंतिपंडिताः सर्वेसमस्ते पिक्रियापदे ॥ १४ ॥
अत्रसमस्तेपिइदमेवक्रियापदंअस्मिन्समस्ते पीतिक्रियापदेसात्सात्ससपि सर्वेपंडिताः भ्रमं

वासनावासुदेवस्य वासितं भुवनत्रयं॥ सर्वभूतनिवासीनां वासुदेव नमोस्तुते॥१५॥ अस्यार्थः हे अंब हे आ
सुदे आ समंतात्सुखुं ददातीति आसुदा तत्संबुद्धौ हे आसुदे ते तुभ्यं नमः। अस्तु। यतः हे असुदे असून् प्राणा
न् ददातीति असुदा तत्संबुद्धौ हे असुदे वर देवर दे त्वं भुवनत्रयं अवसि। कया वासनां। वासः आधारः स
एव नोः नया वासनावा। उक्तं हि। कल्पांते नौ रूपः परमात्मा सन्सः हरिः पृथ्वीं आरुह्य अनाधारितं विश्वं
रक्षति। किंभूतं भुवनत्रयं अवासितं। निवासार्थ काइ सत्वे वसत्यस्मिन्निति सधिकरणे क्तिपि वा इति रू
पं। न वाः अवाः अनाधारे तं इतं प्राप्तं इति अवासितं। इतो जाताद्यर्थे। किंभूता त्वं। सर्वभूतनिवासीना।
सर्वभूतेषु निवसनं सर्वभूतनिवासी ईश्वरः स इनो भर्ता यस्याः सा सर्वभूतनिवासीना। इनः स्वामिनि
सूर्ये चेत्स मरः। इति भवानी पक्षे। वासनेति। हे अंबा सुदेव। अंबायाः असून् प्राणान्दीव्यति क्रीड
यति मोदयतीति वा। अंतर्भावितण्यर्थक दीव्यतेः पचाद्यच्स्वरूपं तत्संबुद्धौ हे वासुदेव पार्वती प्राणना
थ तेहनि त्वया भुवनत्रयं अवासितं रक्षितं। कथं भूतं भुवनत्रयं। वासना वासुवा। वासनापदेन

तद्विशिष्टा जीवाः ते च संत्यस्मिन्निति अधिकरणेऽण् बोध्यः। संसारिप्राणिषु रक्षमित्यर्थः। शास
योरभेदात् हे शर्व। हे भूतनिवासीन। भूतेषु निवसतेइति भूतनिवासीन दधिष्ठात्री देवतान स्याः
इनः स्वामी तत्संबुद्धौ हे भूतनिवासीन ते तुभ्यं नमः अस्तु। एकत्र त्वबुद्धिश्चेति नियमः। दे द्वितीया
द्विवचनं अविधाशाने अवस्ति। त्वं सगुणो निर्गुणो पीत्यर्थः। इति शंभुपक्षे। वासनेति। हे अंबासुदे
वपूर्ववद्व्याख्येयं। हे अंबासुत। अंबायाः आत्मजे प्रसवतीति अंबासुतः। हे पार्वतीपुत्र। हे ए।
हे कामरूप। हे सर्वभृत। शासयोरभेदात् सर्वोत्तम। हे निवासीन। निवे मूषके आस्ते स तत्संबो
धनं। अथवा। सरंतीति सर्वाः ते च ते भूताश्च सर्वभूताः सर्वभूतानां निवः मूषकः अस्मि आसीनः
तत्संबुद्धिः हे मूषकवाहन मामिति शेषः। अव। तुभ्यं नमोस्तु। चयनः स्व यावासना सुभुवनत्र
यं रक्षितं। अथच देशवसीति सर्वत्र बोध्यं इति गणेशपक्षे। वासनेति। हे वासुदेव हे ए। कमनी
यरूपत्वात् सर्वमनोरथपूरकत्वाद्वा कामरूप। हे सर्व शासयोरभेदात् हे शंकररूप ते तुभ्यं नमोस्तु।

अतस्त्वं ईन्नां कामानां वासनाः अभिलाषाः तान् स्यति नाशय। अथवा अथवा शब्दः समुच्चय
रक्षस्वेत्यर्थः। पतितोहमसुन्। नस्तुते स्वसुरन् अपलेरहितः असामर्थ्यवान् एकल इति यावत्।
किंभूतस्त्वं। भूतनिवासी। भूतेषु निवसते अंतर्यामित्वेनेति सः किंच त्वया भुवनत्रयं वासि
तं। उत्पादितं। कर्तुमकर्तुमन्यथाकर्तुं समर्थोसीत्यर्थः। यद्वा। हे सर्वभूतनिवासीनां व। सर्वभू
तं यस्मिन् तत् सर्वभूतमुदकमिति पुराणप्रसिद्धिः। तत्र निवसते चंद्रः अब्धिपुत्रत्वात्। स
र्वभूतन्निवासी च इनश्चागोऽम्बेन त्रेयस्या सौ सर्वभूतनिवासीनां वः तत्संबुद्धौ। अग्रेसर्वेऽप्याग
वत्। अथवा त्वं सर्वभूतनिवासी। सर्वभूतेषु जलराशौ निवसते शयनेनेन मः। अग्रे प्राग्वत्।
इति विद्युपक्षे। वासनेति। हे अंबमान रूप हे इन सूर्य। हे वासुदेव। आ समंतात् सुष्ठु दीप्यति
प्रकाशते हे देदीप्यमान हे वासुदेव। अस्यते क्षिप्यते कालरूपो मार्गेयिन सः। अस्तरथः तेन
दीप्यति क्रीडते सत पश्यति त्वं संबुद्धिः नेनुष्यं नमोस्तु। अतस्त्वं मे वासनाः विषयवासनाः अस्य।

१६

नारायण। त्वया भुवनत्रयं वासितं रक्षितं। त्वं सर्वभूतनिवासी ओतप्रोतरूपेण सर्वत्रास्थितिक
र्ता। यद्वा त्वं भुवनत्रयं वासितं उज्वलं अतिशुक्लीकुर्वन् असि। यत् भुवनत्रयं वासनेव विष्णुमाया
मयमित्यर्थः। यद्वा वास्त्रा स्नेहे नौ वा यतः कारणात्। भुवनत्रयं वासितं असि कुर्वन् असि। तस्माद्वासना
वावासः आधारः स एव नौः तया अधान् विधानं यस्य नारायण। अथवा हे वासनावाः। वासैः अभिला
षं वाति वांछति ददाति वा वासनावाः तत्संबोधनं त्वं अधारत् धिंधात्। अधादनिति स्त्रयीपक्षे। यद्वा।
सर्वपक्षे अर्थान्तरं यथासंभवं ऊह्यते। वासनेति। हे वासनावासुदेव वासना अभिलाषाः तान् वां
छित गृह्णन्ति ते वासनावाः तेषां असुदेवधनिनां प्राणेश भुवनत्रयं सितं स्वामी छदानेन उज्वलं कु
र्वन्नित्यर्थः। यद्वा ते विघ्नास्ते मां असुदेव निभ्रराज। यद्वा हे बईनां असुदेवलक्ष्मीनां प्राणेश नेत्वया
भुवनत्रयं वासितं अवितं। उक्तं च। उषितं वासुदेवेन क्षीराब्धौ क्रोधमूर्तिना। एकार्णवे हि लोकाब्धौ कू
र्मरूपेण चन्निधा। किंभूतस्य ते वासनावासुदेवस्येत्यादि। यद्वा हे वास वा वासयती निवासनः तत्सं

नां ४

बुद्धिः त्वं भुवनत्रयमरयालय। किंभूतं भुवनत्रय सर्वभूतनिवासि। सर्वाणि भूतानि निवसं
यस्मिन्तत् हे अस्तुदेव हे प्राणेश्वर ईनां कर्मादीनां वासितं ते वा मे नैतं कुरु हे वासुदेव नेतुभ्यं नमोऽ
